पाठ्यक्रमविवरणम् (Minor stream for shastri (B.A) Three year course

## गौडीयदर्शनम् अचिन्त्य भेदाभेददर्शनं वा

**शास्त्रिप्रथमवर्षम्    प्रथम सत्रार्द्धम्    GE1    क्रेडिट-1    Unit-1**

- रसरूपस्य भगवतःसवीश्रयत्वविचारः
- भक्तेः स्वप्रकाशकत्वमितरनिरपेक्षत्वं पुरुषार्थशिरोमणित्वञ्च
- साधनभक्तया सर्वक्लेशनिवृत्तिः शुभावाप्तिश्च
- श्रद्धायाः सत्संगतेश्च स्वरूपम्
- भजनक्रियायाः विविधा अवस्थाः

**GE1    क्रेडिट-1    Unit-2**

- अनर्थनिवृत्तिविमर्शः
- नामापराधाः तन्निरसनोपायाश्च
- निष्ठायाः स्वरूपम्
- निष्ठिताया भक्तेः लक्षणम्

**GE1    क्रेडिट-1    Unit-3**

- रुचेः स्वरूपं भेदश्च
- जातरुचे र्भक्तस्य समाचरणम्
- आसक्तेः लक्षणम्
- जातासक्ते र्भक्तस्य भावाः

**GE1    क्रेडिट-1    Unit-4**

- भावपुष्पस्य प्रेमफलत्वेन परिणमनम्
- प्रेमणा समाकृष्टस्य भगवतः साक्षात् प्राकट्यम्
- भगवतो विविधमाधुर्याणि
- भगवतो माधुर्यविशेषाणां भक्तेन समास्वादनं च।

**उद्देश्यम् (objective)**

भक्तिः यथाविधि समाचरिता सती मानवाय शान्तिं पूर्णतां च प्रापयति। गौडीयदर्शनस्यापि प्रमुखप्रतिपाद्यं तत्त्वं भगवद्भक्तिरस्ति। सा भक्ति: केवला, निर्गुणा,उत्तमा निष्कामा इत्यादिभिः विशेषणैः परिलक्षिता प्रशस्यते। अत: तादृश्या: भक्तेः किं लक्षणं, के च तद्भेदा:, साधने प्रमुखःक्रम: कः; कानि च तत्र बाधकानि तत्त्वानि सा च भक्ति: सिद्धयवस्थायां कां संज्ञां दधति ? किञ्च फलं प्रसूते इत्यादिपरमोपयोगिविषया सर्वोपयोगिनः वर्तन्ते। तेषामेव विषयाणां यथाशास्त्रं ज्ञानं सम्पादयितुं पत्रमिदं व्यवस्थापितम्।

**फलाधिगतिः Cout come)**

पत्रस्यास्य अध्ययनेन भगवद्भक्तौ प्रवर्तितुं समीहमानःसाधक: साधनमार्गस्य उपयोगिनः विषयान् सरलतया सरसतया च जानीयात्। किञ्च स्वमार्गे के विघ्नाः ? कश्च तन्निराकरणे उपाय: ? इत्यपि अपेक्षितं तथ्यं जिज्ञासुः अधिगच्छेत्। भक्तस्य आचरणं, भक्तिसिद्धौ तत्प्राप्यमित्यपि जानन्तः साधकाः स्वमार्गे प्रवृत्तौ उत्सहेरन् इति फलाधिगतिः पत्रस्यास्य अध्ययन प्रसंगे सुस्पष्टा।

**आधारग्रन्थः (Main text Book)**

- श्रीविश्वनाथचक्रवर्तिपादप्रणीता माधुर्य कादम्बिनी
  अध्येतव्य विषयाणाम् आधारग्रन्थः विद्यते।

**सङ्गतिः (Inter link )**

गोडीयदर्शनस्य मुख्यः प्रतिपिपादेयिषितो विषय: भगवद्भक्तिरस्ति। उत्तमायाः भक्तेः विषये साङ्गोपाङ्गं ये ज्ञातुमिच्छन्ति तेषां कृते प्रकरणस्यास्य संयोजनं संगच्छते।

सन्दर्भग्रन्थाः - (Reference Books)

- भक्ति सन्दर्भः श्रीजीवगोस्वामिप्रणीतः
- भक्तिरसामृतसिन्धुः श्रीरूपगोस्वामिप्रणीतः
- भक्तिरसामृतसिन्धुबिन्दुः श्री विश्वनाथ चक्रवर्तिप्रणीतः

प्राप्तिस्थावम्- केशवजी गौडीयमठः मथुरा

-खण्डेलवाल बुक स्टोर, वृन्दावन

-हरिनाम प्रेम-वृन्दावन